## एकः पूर्वपरयोः । (८४/६८)

अधिकारोऽयम् । 'ख्यत्यात् परस्य' (६.१.११२/२५५) इति प्रागेतस्मात् सूत्रात् इत उत्तरं यद् वक्ष्यामस्तत्र पूर्वस्य परस्य[1] द्वयोरपि स्थाने एकादेशो भवति [2]इत्येतद् वेदितव्यम् । वक्ष्यति 'आद् गुणः' (६.१.८७/६९) इति । तत्र अचि पूर्वस्य अवर्णात् च परस्य[3] स्थाने एको गुणो भवति । खट्वेन्द्रः । मालेन्द्रः[4] । पूर्वपरग्रहणं द्वयोरपि युगपदादेशप्रतिपत्त्यर्थम्, एकस्यैव हि स्यात्, नोभे सप्तमीपञ्चम्यौ युगपत्[5] प्रकल्पिके भवतः इति । एकग्रहणं पृथगादेशनिवृत्त्यर्थं, स्थानिभेदाद्धि भिन्नादिषु नत्ववद् द्वावादेशौ स्याताम् ॥

## अन्तादिवच्च । (८५/७५)

एकः इति वर्तते, पूर्वपरयोः इति च । 'एकः पूर्वपरयोः' (६.१.८४/६८) इति योऽयमेकादेशो विधीयते स पूर्वस्य अन्तवद् भवति, परस्यादिवद् भवति । यथा तस्यान्तः आदिर्वा तदन्तर्भूतः तद्ग्रहणेन गृह्यते, तद्वदेकादेशोऽपि तद्ग्रहणेन गृह्यते इत्येषोऽतिदेशार्थः । ब्रह्मबन्धूः इत्यत्र ब्रह्मबन्धु इति प्रातिपदिकम्, ऊङः इति अप्रातिपदिकम्, तयोः प्रातिपदिकाप्रातिपदिकयोर्यः एकादेशः स प्रातिपदिकस्यान्तवद्भवति, यथा शक्यते[6] कर्तुं 'ङ्याप् प्रातिपदिकात्' (४.१.१/१८२) इति स्वादिविधिः । वृक्षौ इत्यत्र [7]सुबौकारः असुबकारः, तयोः सुबसुपोरेकादेशः सुपः आदिवद् भवति, यथा शक्यते वक्तुं सुबन्तं पदम् (१.४.१४/२९) इति ।

वर्णाश्रयविधौ अयमन्तादिवद्भावो नेष्यते । [8]तथा हि खट्वाभिः इत्यत्रान्तवद्भावाभावात् 'अतो भिस ऐस्' (७.१.९/२०६) इति [9]न भवति । ह्वयतेः जुहाव इति सम्प्रसारणपूर्वत्वस्य आदिवद्भावाभावात् 'आत औ णलः' (७.१.३४/२३७१) इति[10] न भवति । अस्यै अश्वः, अस्या अश्वः इति 'वृद्धिरेचि' (६.१.८८/७२) इति वृद्धिः, 'एङः पदान्तादति' (६.१.१०९/८६) इत्यत्र विधौ आदिवन्न भवति । [11]पूर्वपरसमुदाय एकादेशस्य स्थानी, स हि तेन निवर्त्यते । तत्रावयवयोरानुमानिकं स्थानित्वम् इति तदाश्रयं कार्यं स्थानिवद्भावादप्राप्तम् इत्यन्तादिवद्भावो विधीयते ॥

## षत्वतुकोरसिद्धः । (८६/३३३३)

षत्वे तुकि च कर्तव्ये एकादेशो[12]ऽसिद्धो भवति, सिद्धकार्यं न करोति इत्यर्थः । [13]असिद्धवचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च (म. भा. ३.६५) । [14]कोऽसिचत् इत्यत्र [15]'एङः पदान्तादति' (६.१.१०९/८६) इति एकादेशस्य परं प्रत्यादिवद्भावात् अपदादेरिण उत्तरस्यादेशस्य सकारस्य षत्वं प्राप्नोति, तदसिद्धत्वान्न भवति । कोऽस्य, योऽस्य, कोऽस्मै, योऽस्मै [16]इत्येकादेशस्यासिद्धत्वात् इणः (८.३.३९/१५३) इति षत्वं न भवति । तुग्विधौ – अधीत्य, प्रेत्य इत्यत्रैकादेशस्यासिद्धत्वात् 'ह्रस्वस्य पिति कृति तुक्' (६.१.७१/२८५८) इति तुग् भवति ।

[६७७] सम्प्रसारणङीट्सु प्रतिषेधो वक्तव्यः । (म. भा. ३.६६)

---

1. च इत्यधिकम् ङ. 2. इत्येवं तद् वेदितव्यम् फ. 3. अचः इत्यधिकम् ङ. 4. उपेन्द्रः इत्यधिकम् ब. 5. षष्ठी इत्यधिकम् ब. 6. विधिः इत्यधिकम् क. 7. सुबन्तौकारः ह. 8. यथा हि फ. 9. एत्वं इत्यधिकम् फ. 10. औत्वं इत्यधिकम् फ. ह. 11. पूर्वसमुदायस्य ङ. 12. सो इत्यधिकम् क. 13. षत्वलुकोः इत्यधिकम् ब. फ. ह. 14. सिञ्चत् ह, क्व असिञ्चत् इति क. 15. एङः नास्ति फ. 16. इत्यत्र ग. ह.